# Chintakhandana Stotram

# ચિન્તાખણ્ડનસ્તોત્રમ્

## Document Information

Text title : Chintakhandana Stotram

File name : chintAkhaNDanastotram.itx

Category : misc, vAdirAja, stotra, advice

Location : doc_z_misc_general

Author : vAdirAjayati

Proofread by : Meenakshi Premanand, Revathy R.

Latest update : May 10, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 10, 2024

*sanskritdocuments.org*

# ચિન્તાખણ્ડનસ્તોત્રમ્

યયા તે ધર્મકામૌ ચ યયા તે વ્યર્થમાજનિ ।
કિં તયા ચિન્તયા જીવ હન્તાહન્તાઽફલા તવ ॥ ૧॥

સુખમીશેચ્છયા નૃણાં દુઃખં ચાપિ તદિચ્છયા ।
ન સ્વેચ્છયા ભવેત્કિઞ્ચિદ્ધન્તાહન્તા ફલા તવ ॥ ૨॥

અદતો મદતોઽન્ધસ્ય જિહ્વાં બહ્વાશિનો નર ।
સન્તઃ ખાદન્તિ દન્તાસ્તે હન્તાહન્તાઽફલા તવ ॥ ૩॥

મહત્વે તે યદાઽઽકાઙ્ક્ષા મહત્વેવ ભયં તદા ।
જીવ કિં જીવનાર્થેઽતશ્ચિન્તયા ચિન્તયાઽચ્યુતમ્ ॥ ૪॥

મહાપદ્યાગતાયાં હિ મહાપદ્યાર્થિનોઽધુના ।
હરિણા સ્વૈરિણા ત્રાતાઃ કિં ન ખિન્નકૃપાલુના ॥ ૫॥

મમતા યેષુ તે નિત્યમમતાસ્તેઽત એવ હિ ।
અહન્તા યત્ર તે જીવ ન હન્તા તસ્ય કિં યમઃ ॥ ૬॥

ન સ્વેષાં સ્વેચ્છયાઽકાર્ષીત્કષ્ટં વાઽત્યક્રમીદિહ ।
નરો વાઽપ્યથવા નારી સુરો વાઽપ્યસુરોઽપિ વા ॥ ૭॥

સ્વેષ્ટાનાસ્યા રોદનેન “રુદ્રો અરુદદ્” ઇતિ શ્રુતિઃ ।
નર્તે ત્વત્ક્રિયતે કિઞ્ચિદિત્યાહાન્યાચ્યુતં પ્રભુમ્ ॥ ૮॥

પાર્થાન્પાર્થસતીમાર્તાં હરં ભસ્માસુરાર્દિતમ્ ।
વિરોચનસ્ય પિતરં કઃ કષ્ટાત્પ્રાગ્વ્યમોચયત્ ॥ ૯॥

શત્રવો યાન્તિ મિત્રત્વં મિતેઽમિત્રે સતાં હરૌ ।
મિત્રાણ્યેવ ચ શત્રુત્વં શત્રૌ શત્રૌ સુરદ્વિષામ્ ॥ ૧૦॥

પિતુર્વધે પુત્ર એવ કારણં પ્રાગભૂદિતિ ।
કિં ન શ્રુતં સર્પવૈરી સર્પસ્યૈવાભયઙ્કરઃ ॥ ૧૧॥

દુઃખાસ્પૃષ્ટો હરિસ્ત્વેકો દુઃખસ્પૃષ્ટાસ્તતોઽપરે ।
અતો ન ભીતો દુઃખેભ્યો ભવાનુભવધીરધીઃ ॥ ૧૨॥

સુખસ્યાનન્તરં દુઃખં દુઃખસ્યાનન્તરં સુખમ્ ।
ઇતિ યન્નિયમસ્તસ્માન્નિયમે નિયમં કુરુ ॥ ૧૩॥

અતો દુરન્તયા સ્વાન્તચિન્તયા કિં ચિદન્તયા ।
હયાનનં દયાસિન્ધું સ્મર સ્મરદભીષ્ટદમ્ ॥ ૧૪॥

આચતુર્દશમાદ્વર્ષાદ્યા ચિન્તા હૃદિ દેહિનામ્ ।
વાદિરાજો યતિસ્તસ્યાઃ ખણ્ડનાયેદમભ્યધાત્ ॥ ૧૫॥

ઇતિ શ્રીમદ્વાદિરાજપૂજ્યચરણવિરચિતં
ચિન્તાખણ્ડનસ્તોત્રં સમ્પૂર્ણમ્ ।

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ।

Proofread by Meenakshi Premanand

*Chintakhandana Stotram*
pdf was typeset on May 10, 2024

Please send corrections to *sanskrit@cheerful.com*